श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ पवमानसूक्तम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ पवमानसूक्तम् ॥

हिरण्यवर्णाः शुचयः पावका यासु
जातः कश्यपो यास्विन्द्रः।
अग्निं या गर्भं दधिरे विरूपास्ता न
आपश्शग्ग् स्योना भवन्तु॥

यासाग्ं राजा वरुणो याति मध्ये
सत्यानृते अवपश्यं जनानाम्।
मधुश्चुतश्शुचयो याः पावकास्ता न
आपश्शग्ग् स्योना भवन्तु॥

यासां देवा दिवि कृण्वन्ति भक्षं या
अन्तरिक्षे बहुधा भवन्ति।
याः पृथिवीं पयसोन्दन्ति शुक्रास्ता न
आपश्शग्ग् स्योना भवन्तु॥

शिवेन मा चक्षुषा पश्यताऽऽपश्शिवया
तनुवोप स्पृशत त्वचं मे।
सर्वाग्ं अग्नीग्ं रप्सुषदो हुवे वो मयि
वर्चो बलमोजो निधत्त॥

पवं॑मान॒स्सुव॒र्जनः॑।
प॒वित्रे॑ण॒ विच॑र्षणिः।
यः पोता॒ स पु॑नातु मा॥

पु॒नन्तु॑ मा देवज॒नाः।
पु॒नन्तु॒ मन॑वो धि॒या।
पु॒नन्तु॒ विश्व॑ आ॒यवः॑॥

जात॑वेदः प॒वित्र॑वत्।
प॒वित्रे॑ण पुनाहि मा।
शु॒क्रेण॑ देव॒दीद्य॑त्।
अग्ने॒ क्रत्वा॒ क्रतू॒ग्ं॒ रनु॑॥

यत्ते॑ प॒वित्र॑म॒र्चिषि॑।
अग्ने॒ वित॑तमन्त॒रा।
ब्रह्म॒ तेन॑ पुनीमहे॥

उ॒भाभ्या॑ँ देवसवितः।
प॒वित्रे॑ण स॒वेन॑ च।
इ॒दं ब्रह्म॑ पुनीमहे॥

वै॒श्व॒दे॒वी पु॑न॒ती दे॒व्यागा॑त्।
यस्यै॑ ब॒ह्वीस्त॒नुवो॑ वी॒तपृ॑ष्ठाः।

तया मदन्तः सधमाद्येषु।
वयग्ग् स्याम पतयो रयीणाम्॥

वैश्वानरो रश्मिभिर्मा पुनातु।
वातः प्राणेनेषिरो मयो भूः।
द्यावापृथिवी पयसा पयोभिः।
ऋतावरी यज्ञिये मा पुनीताम्॥

बृहद्भिः सवितस्तृभिः।
वर्षिष्ठैर्देवमन्मभिः।
अग्ने दक्षैः पुनाहि मा॥

येन देवा अपुनत।
येनापो दिव्यङ्कशः।
तेन दिव्येन ब्रह्मणा।
इदं ब्रह्म पुनीमहे॥

यः पावमानीरध्येति।
ऋषिभिस्संभृतग्ं रसम्।
सर्वग्ं स पूतमश्नाति।
स्वदितं मातरिश्वना॥

पावमानीर्यो अध्येति।
ऋषिभिस्संभृतग्ं रसम्।

तस्मै॒ सर॑स्वती दु॒हे।
क्षी॒रग्ं स॒र्पिर्मधू॑द॒कम्॥

पा॒व॒मा॒नीस्स्व॒स्त्यय॑नीः।
सु॒दुघा॒ हि पय॑स्वतीः।
ऋषि॑भि॒स्संभृ॑तो॒ रस॑ः।
ब्रा॒ह्म॒णेष्व॒मृतग्ं॑ हि॒तम्॥

पा॒व॒मा॒नीर्दि॑शन्तु नः।
इ॒मं लो॒कमथो॑ अ॒मुम्।
कामा॒न्थ्सम॑र्धयन्तु नः।
दे॒वीर्दे॒वैः स॒माभृ॑ताः॥

पा॒व॒मा॒नीस्स्व॒स्त्यय॑नीः।
सु॒दुघा॒ हि घृ॑त॒श्चुत॑ः।
ऋषि॑भि॒ः संभृ॑तो॒ रस॑ः।
ब्रा॒ह्म॒णेष्व॒मृतग्ं॑ हि॒तम्॥

येन॑ दे॒वाः प॒वित्रे॑ण।
आ॒त्मान॑ं पु॒नते॒ सदा᳚।
तेन॑ स॒हस्र॑धारेण।
पा॒व॒मा॒न्यः पु॑नन्तु मा॥

प्रा॒जा॒प॒त्यं प॒वित्र᳚म्।
श॒तोद्या॑मग्ं हि॒र॒ण्मय᳚म्।
तेन॑ ब्रह्म॒ विदो॑ व॒यम्।
पू॒तं ब्रह्म॑ पुनीमहे॒॥

इन्द्र॑स्सुनी॒ती स॒हमा॑ पुनातु।
सोम॑स्स्व॒स्त्या वरु॑णस्स॒मीच्या᳚।
य॒मो राजा᳚ प्रमृ॒णाभि॑ः पुनातु मा।
जा॒तवे॑दा मो॒र्जय॑न्त्या पुनातु।
भूर्भुव॒स्सुव॑ः॥

तच्छं॒ योरावृ॑णीमहे।
गा॒तुं य॒ज्ञाय॑।
गा॒तुं य॒ज्ञप॑तये।
दैवी᳚ स्व॒स्तिर॑स्तु नः।
स्व॒स्तिर्मानु॑षेभ्यः।
ऊ॒र्ध्वं जि॑गातु भेष॒जम्।
शं नो॑ अस्तु द्वि॒पदे᳚।
शं चतु॑ष्पदे।
ओं॑ शान्ति॒श्शान्ति॒श्शान्ति॑ः॥

## प्रोक्षण मन्त्राः

दे॒वस्य॑ त्वा सवि॒तुः प्र॑स॒वे।
अ॒श्विनो᳚र्बा॒हुभ्या᳚म्।
पू॒ष्णो हस्ता᳚भ्याम्।
अ॒श्विनो॒र्भैष॑ज्येन।
तेज॑से ब्रह्मवर्च॒साया॒भिषि॑ञ्चामि॥

दे॒वस्य॑ त्वा सवि॒तुः प्र॑स॒वे।
अ॒श्विनो᳚र्बा॒हुभ्या᳚म्।
पू॒ष्णो हस्ता᳚भ्याम्।
सर॑स्वत्यै॒ भैष॑ज्येन।
वी॒र्या॑या॒न्नाद्या॑या॒भिषि॑ञ्चामि॥

दे॒वस्य॑ त्वा सवि॒तुः प्र॑स॒वे।
अ॒श्विनो᳚र्बा॒हुभ्या᳚म्।
पू॒ष्णो हस्ता᳚भ्याम्।
इन्द्र॑स्येन्द्रि॒येण॑।
श्रि॒यै यश॑से॒ बला॑या॒भिषि॑ञ्चामि॥

अ॒र्य॒मणं॒ बृह॒स्पति॒मिन्द्रं॒ दाना॑य चोदय।
वाचं॒ विष्णु॒ग्ं॒ सर॑स्वतीग्ं सवि॒तारं॑ च वा॒जिन᳚म्।

सोम॒ग्ं॒ राजा॑नं॒ वरु॑णम॒ग्निम॒न्वार॑भामहे।
आ॒दि॒त्यान् विष्णु॒ग्ं॒ सूर्यं॑ ब्र॒ह्माणं॑ च॒ बृह॒स्पति᳚म्॥

दे॒वस्य॑ त्वा सवि॒तुः प्र॑स॒वे᳚ऽश्विनो᳚र्बा॒हुभ्यां᳚
पू॒ष्णो हस्ता᳚भ्या॒ग्ं॒ सर॑स्वत्यै वा॒चो
य॒न्तुर्य॒न्त्रेणा॒ग्नेस्त्वा॒ साम्रा᳚ज्येना॒भिषि॑ञ्चा॒मीन्द्र॑स्य
त्वा॒ साम्रा᳚ज्येना॒भिषि॑ञ्चामि॒ बृह॒स्पते᳚स्त्वा॒
साम्रा᳚ज्येना॒भिषि॑ञ्चामि॥

दे॒वास्त्वेन्द्र॑ज्येष्ठा॒ वरु॑णराजानो॒ऽधस्ता᳚च्चो॒परि॑ष्टाच्च
पान्तु॒ न वा ए॒तेन॑ पू॒तो न मेध्यो॒ न प्रोक्षि॑तो॒
यदे॑न॒मतः॑ प्रा॒चीनं॑ प्रो॒क्षति॒ यथ्सञ्चि॑त॒माज्ये॑न
प्रो॒क्षति॒ तेन॑ पू॒तस्तेन॒ मेध्य॒स्तेन॒ प्रोक्षि॑तः॥

**॥ इति पवमानसूक्तं समाप्तम् ॥**